# Kailasaprasadavarnanam Shivarahasyantargatam

# कैलासप्रासादवर्णनम् शिवरहस्यान्तर्गतम्

## Document Information

Text title : Kailasaprasadavarnanam Shivarahasyantargatam

File name : kailAsaprAsAdavarNanamshivarahasyAntargatam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 17 - kailAsaprAsAdavarNanam | 43-74||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2023

*sanskritdocuments.org*

# कैलासप्रासादवर्णनम् शिवरहस्यान्तर्गतम्

- स्कन्दप्रोक्तम् शिवरहस्यान्तर्गतम् -
मणिप्रभाभिस्सततं सोमसूर्यौ तिरस्कृतौ ।
सरसीमध्यसङ्कॢप्तसौधोद्यद्वरकुम्भकः ॥ ४३॥

मणिस्तम्भकृतासारभाभासितदिगन्तरः ।
सुवर्णाम्बरसङ्कॢप्तविततामलमौक्तिकैः ॥ ४४॥

जालिकापालिकापारवितानावलिभासुरः ।
तन्मध्यहीरकोत्तुङ्गसिह्मासनवराश्रितः ॥ ४५॥

तत्रदेव्या महादेवो विहारशयनासनैः ।
सरःप्रान्तोरुकलशधारासारोर्ध्वशीकरैः ॥ ४६॥

यन्नीरतीरगन्धोद्यद्धारासारौघशीकरैः ।
कदाचित्तत्र मध्यस्थो देव्या व्यजनहस्तया ॥ ४७॥

सेवितश्श्रीमहेशानः क्वचित्पीठस्थितश्शिवः ।
तत्र नानाविधाः क्रीडा देव्या चक्रे महेश्वरः ॥ ४८॥

विचित्राणां चरित्राणां त्रिणेत्रप्रियकाम्यया ।
देव्या प्रमुदितो देवस्तत्र सौधवरेषु च ॥ ४९॥

काश्चित्तत्र वदाम्यद्य शृणु भूसुर शाम्भव ।
विपिने सरसस्तीरे प्रासादाग्रेव गोपुरे ॥ ५०॥

विजहार महादेवो भवान्या शङ्करस्तदा ।
शैलमालोकयद्देवो देव्या देवी सखीगणैः ॥ ५१॥

अदर्शयद्विचित्राणि तस्मिन्कैलासपर्वते ॥ ५२॥

सालतालकृतमालतमालैरामलक्यवकुलार्जुनपाटलैः ।
पानसैलिकुचवाह्लिकनीपैर्दाडिमैश्च सुरसालरसालैः ॥ ५३॥

जम्बूनिम्बकदम्बजैः फलभरैस्तक्कोलहिन्तालकै-
रङ्कोलेस्सरलैरशोकतिलकैस्तिन्दूकमालूरकैः ।
पुन्नागैर्नगनागसर्जरसिकैः चाम्पेयमाधूककैः
प्लक्षाश्वत्थकपित्थतिन्त्रिणिभवैर्भूनिम्बजालैर्धवैः ॥ ५४॥

क(व)टकुटजकुरण्ठैः कर्णिकाराश्वमारैः खरबदरपलाशैर्लोद्ध्रसञ्चन्दनैश्च ।
कुरवकशुकतुण्डैश्शिंशुपाचेङ्गदीभिर्लिकुचविकचभण्डः केतकैस्मिन्दुवारैः ॥ ५५॥

केदारकोविदारैश्च देवदारुकपित्थकैः ।
तगरागरुकृष्णाभ्रैस्तुङ्गनीपककम्रकैः ॥ ५६ ॥

मन्दारद्वयपारिजातवकजैरर्कैश्च सप्तच्छदैः
पूगीनारलखर्जुरैश्च कुटजैर्नारङ्गजातिद्रुमैः ।
प्लक्षोदुम्बरकन्दलैर्मुनिभवै राजादनैर्बर्बरैः
शल्मल्यैर्वरशिग्रुकैर्मधुभवैस्सन्मालिङ्गैरपि ॥ ५७॥

भूतावासहरीतकीत्रिकटुकैश्शम्युद्भवैः किन्दरैः
प्राचीनामलकैः करञ्जककुभैर्गन्धात्तजम्बूफलैः ।
बन्धूकैश्चिरिबिल्वजैश्च तरगैः कृष्णागरूत्थैर्दुमैः
मालिङ्गैश्च शिरीषकैः कुसुमितैरन्यैश्च शाखाशतैः ॥ ५८॥

मल्लीमालतिजातिकासुरभितैस्सायन्तनोन्निद्रितैः
चन्द्रासारविकासितैरतिसितैस्सच्चन्द्रिकावल्लिभिः ।
वल्लीनान्निवहैः कदम्बजरजस्सन्दोहगन्धानिलैः
उत्फुल्लैस्तिलकैस्तमालजसुमैः फुलैर्लसत्केसरैः ॥ ५९॥

कुन्दैरिन्दुकरप्रसारितमुखैरालोलसप्तच्छदैः
कौसुम्भैररुणप्रभासुमधुरैः प्रोद्भूतसत्केसरैः ।
द्राक्षागुच्छसुवल्लिकासितसिताः पुण्ड्रेक्षुसाराकराः
पूगद्रुङ्गवलीकृताङ्गमधुरास्सन्नागवल्लीलताः ॥ ६०॥

मन्दारसुन्दरतरुप्रकरैः प्रफुल्लैरुत्फुल्लदाडिमसुमैर्बककर्णिकारैः ।
पीतायमानसुषमायुतचम्पकैस्तैरुत्फुल्लपाटलकदम्बजराजवृक्षैः ॥ ६१॥

सत्किंशुकैश्शुकमुखैर्वरशल्मलीभिः पुन्नागनागनवनीपसुमैः प्रफुल्लैः ।
भारतिभारशिखरैः कलधौतशैलः पश्याम्बिकेऽद्य सुमनोहरवृक्षसङ्घैः ॥ ६२॥

वल्लीविकासिततनुः प्रसभं भवानि प्रोद्यत्सुधांशुचयकोटिनिभो विभाति ॥ ६३॥

उत्फुल्लामलपुण्डरीककुमुदैर्नीलोत्पलैस्सुन्दरैः
आरक्ताम्बुजकञ्जनीभिरभितस्मद्रत्नसोपानकैः ।
तत्प्रान्तामलबिल्वमूलजमहालिङ्गाकृतिश्शङ्करः
तुष्यत्येव सरस्सुरुद्गणपैर्देव्यागिरीन्द्रेऽधिकम् ॥ ६३॥

तद्ध्यानधारामृतपानपीनास्स्वात्मैकताना इव चक्रवाकाः ।
सरस्सु कलोलचलात्तपक्षा हंसा बकास्सारसपङ्क्तयथ ॥ ६४॥

नार्द्रीकृताङ्गाः खलु सञ्चरन्ति भावा भवाब्धाविव मे प्रभावात् ॥ ६५॥

कपिवरकुलमाद्यचालनालोकनाद्यैः फलपतनजवर्शैः पुष्परेणप्रकीर्णैः ।
शिखरिशिखरसारा भूमयश्शोशुभन्ते करिकटमदधाराप्रस्त्रवैः पङ्किलाश्च ॥ ६६॥

शुकबकपिककाककोकधूकैः निभृतविनादितचक्रवाकपाकैः ।
गहनविपिनशाखिमस्तसंस्थामधुराराववनादिचक्रवाकैः ॥ ६७॥

गिरिवरशिखराग्रे नृत्तसाटोपवबर्हार्हरिकुलकृतघोषै-
र्वृद्धितवारणानां कैलासप्रासादवर्णनम् ।
गिरिशिरसि निनादैस्सारसानां शुकानां
पिकरवकलकण्ठैर्नादितस्तद्गृहान्तः ॥ ६८॥

महिषचमरकुञ्जदन्तशृङ्गैः खरखुरघट्टनशैलसानुनिम्नः ।
सुमनजगतवायुबन्धुरानुमोदद्रुमरजसङ्कृतिद्रोणिलम्बिक्षौद्रः ॥ ६९॥

फलकुलसुमभारदीर्घितानम्रशाखाव्रज-
दलिकुलमालानीलनीलाब्जतुल्याः ।
मधुररसमुपेशीलम्बहस्ताग्रशाखा
हरगिरिवरभागा भान्ति सौवर्णवृक्षाः ॥ ७०॥

कलधौतनगप्रशस्तमुस्तापुलकाम्रेडितकोलजालमेतत् ।
सितदंष्ट्रोत्थितघोणघर्घरोरुरावं पश्यमुदागिरीन्द्रजाते ॥ ७१॥

हरिखरनखरैर्विदारितोद्यत्करिकुम्भोद्यत-
रक्तयुक्तमुक्तामणिजालावृतभूमिभागमेतत् ।
द्विपकुलमिदमत्युदारघोषं हरिणो धावति सिह्मनादभीतः ॥ ७२॥

वल्मीकोर्ध्वफणम्फणीश्वरकुलं वातोत्थदिक्चक्रक-
ञ्चार्तत्रस्तविलोचनं हरिरवैर्भीत्या प्रसूतं शिशुम् ।
त्यक्त्वा धावति पश्य पश्य गिरिजे प्रोड्डीनमेणीकुलम् ॥ ७३॥

कैलासाचलरत्नसौधगमहासिंह्मासनाध्यासितो
देव्युत्फुल्लमुखारविन्दविगलन्माध्वीकसारं मधु ।
पीत्वा लोचनषड्वदैर्वदति तां पश्येति लिङ्गान्युमे
बिल्वी कोमलपल्लवैरनुदिनङ्कैलासशृङ्गेऽर्चितम् ॥ ७४॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये स्कन्दप्रोक्तं कैलासप्रासादवर्णनम् ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः १७ - कैलासप्रासादवर्णनम् । ४३-७४ ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 17 - kailAsaprAsAdavarNanam . 43-74..

Notes:
Skanda स्कन्द describes in detail the principal abode of Śiva शिव at Mount Kailāsa कैलास प्रासाद.
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) शिवरहस्यम् अंशः-१ (माहेश्वराख्य) has several descriptions about Mount Kailāsa कैलास शैल and Śiva शिव. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Kailasaprasadavarnanam Shivarahasyantargatam*
pdf was typeset on December 17, 2023

Please send corrections to *sanskrit@cheerful.com*